**Sanskrit October Month class-6**

# द्वादशःपाठः

# दशमः त्वम असि (दसवें तुम हो)

## कठिन शब्दार्थाः

- एकदा - एक बार
- तीर्त्वा - तैर कर
- अपि सर्वे उत्तीर्णा- क्या सब पार कर गए हैं?
- तूष्णीम - चुपचाप
- अतिष्ठान - बैठ गए
- स्नातुम - नहाने के लिए
- युष्माकम - तुम लोगों का

## शब्दार्थाः

- दृष्टवा - देखकर
- इदानीम - अब
- पथिक - राहगीर
- अगणयत - गिना
- दशमः - दसवाँ
- प्रहष्टाः - प्रसन्न
- भूत्वा - होकर
- आदिशत - आदेश

## अभ्यासः

### वांचनकार्य

प-1 उच्चारणं कुरुत-

| पुँल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|
| एकः | एका | एकम् |
| द्वौ | द्वे | द्वे |
| त्रयः | तिस्त्रः | त्रीणि |
| चत्वारः | चतस्त्रः | चत्वारि |

| | | |
|---|---|---|
| पञ्च | पञ्च | पञ्च |
| षट् | षट् | षट् |
| सप्त | सप्त | सप्त |
| अष्ट | अष्ट | अष्ट |
| नव | नव | नव |
| दश | दश | दश |

## साहित्य

### प्र-2 प्रश्नानाम् उत्तराणि लिखत-

(क) कति बालकाः स्नानाय अगच्छन्?

**उत्तर**-दश बालकाः स्नानाय अगच्छन्।

(ख) ते स्नानाय कुत्र अगच्छन्?

**उत्तर**-ते स्नानाय नदीम् अगच्छन्।

(ग) ते कं निश्चयम् अकुर्वन्?

**उत्तर**-ते निश्चयम् अकुर्वन् यत् दशमः नद्यां मग्नः।

(घ) मार्गे कः आगच्छत्?

**उत्तर**-मार्गे पथिकः आगच्छत्।

(ङ) पथिकः किम् अवदत्?

**उत्तर**- पथिकः अवदत् दशमः त्वम् असि इति।

### प्र-3 शुद्धकथनानां समक्षम् (✔) इति अशुद्धकथनानां समक्षं (✖) कुरुत-

| | |
|---|---|
| (क) दशबालकाः स्नानाय अगच्छन्। | ✔ |
| (ख) सर्वे वाटिकायाम् अभ्रमन्। | ✖ |
| (ग) ते वस्तुतः नव बालकाः एव आसन्। | ✖ |
| (घ) बालकः स्वं न अगणयत्। | ✔ |

| | |
|---|---|
| (ङ) एकः बालकः नद्यां मग्नः। | ✖ |
| (च) ते सुखिताः तूष्णीम् अतिष्ठन्। | ✖ |
| (छ) कोऽपि पथिकः न आगच्छत्। | ✖ |
| (ज) नायकः अवदत्-दशमः त्वम् असि इति। | ✖ |
| (झ) ते सर्वे प्रहृष्टाः भूत्वा गृहम् अगच्छन्। | ✔ |

## प्र–4 मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत-

| | | | | | |
|---|---|---|---|---|---|
| गणयित्वा | श्रुत्वा | दृष्ट्वा | कृत्वा | गृहीत्वा | तीर्त्वा |

(क) ते बालकाः <u>तीर्त्वा</u> नद्याः उत्तीर्णः।
(ख) पथिकः बालकान् दुःखितान् <u>दृष्ट्वा</u> अपृच्छत्।
(ग) पुस्तकानि <u>गृहीत्वा</u> विद्यालयं गच्छ।
(घ) पथिकस्य वचनं <u>श्रुत्वा</u> सर्वे प्रमुदिताः गृहम् अगच्छन्।
(ङ) पथिकः बालकान् <u>गणयित्वा</u> अकथयत् दशमः त्वम् असि।
(च) मोहनः कार्यं <u>कृत्वा</u> गृहं गच्छति।

# रचनात्मक–कार्यम

## प्र–5 चित्राणि दृष्ट्वा संख्यां लिखत-



<u>अष्ट</u> कन्दुकानि।



<u>त्रयः</u> चटकाः।



<u>एकम्</u> पुस्तकम्।



<u>द्वौ</u> मयूरौ।



द्वे बालिके।



षट् तालाः।



पञ्च कपोताः।



दश पत्राणि।

# त्रयोदशः पाठः

# विमानयानं रचयाम (हवाई जहाज बनाएँ )

## कठिन शब्दार्थाः

- विमानयानम - हवाई जहाज
- वायुविहारम - वायु में भ्रमण
- उन्नतवृक्षम - ऊँचे वृक्ष को
- सोपानम - सीढी को
- कृषिकजनानां - किसानों के
- मौक्तिकहारम - मोतियों के हार को

## शब्दार्थाः

- विमले - स्वच्छ
- करवाम - करें
- विपुले - बहुत अधिक
- प्रतियाम - वापस लौटें
- आदाय - लेकर
- हर्षम - प्रसन्नता
- जनयाम - उत्पन्न करें

# अभ्यासः

# साहित्य

**प्र–2 कोष्ठकान्तर्गतेषु शब्देषु तृतीया-विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत–**

यथा– नभः चन्द्रेण शोभते। (चन्द्र)

क. सा **विमलेन** जलेन मुखं प्रक्षालयति। (विमल)

ख. राघवः **विमानयानेन** विहरति। (विमानयान)

ग. कण्ठः **मौक्तिकहारेण** शोभते। (मौक्तिकहार)

घ. नभः **सूर्येण** प्रकाशते। (सूर्य)

ङ. पर्वतशिखरम् **अम्बुदमालया** आकर्षकं दृश्यते। (अम्बुदमालया)

| **प्र–3 भिन्नवर्गस्य पदं चिनुत–** | **भिन्नवर्गः** |
|---|---|
| **यथा** – सूर्यः, चन्द्रः, अम्बुदः, शुक्रः। | अम्बुदः |
| (क) पत्राणि, पुष्पाणि, फलानि, मित्राणि। | मित्राणि |
| (ख) जलचरः, खेचरः, भूचरः, निशाचरः। | निशाचर |
| (ग) गावः, सिंहाः, कच्छपाः, गजाः। | गावः, |
| (घ) मयूराः, चटकाः, शुकाः, मण्डूकाः। | मण्डूकाः |
| (ङ) पुस्तकालयः, श्यामपट्टः, प्राचार्यः, सौचिकः। | सौचिकः |
| (च) लेखनी, पुस्तिका, अध्यापिका, अजा। | अजा |

**प्र–4 प्रश्नानाम् उत्तराणि लिखत–**

(क) के वायुयानं रचयन्ति?

**उत्तर–** राघव-माधव-सीता-ललिताः वायुयानं रचयन्ति।

(ख) वायुयानं कं–कं क्रान्त्वा उपरि गच्छति?

**उत्तर–** वायुयानम् उन्नतवृक्षं तुङ्गं भवनम् आकाशं च क्रान्त्वा उपरि गच्छति।

(ग) वयं कीदृशं सोपानं रचयाम?

**उत्तर–** वयं हिमवन्तं सोपानं रचयाम।

(घ) वयं कस्मिन् लोके प्रविशाम?

**उत्तर**– वयं चन्दिरलोकं प्रविशाम।

(ङ) आकाशे काः चित्वा मौक्तिकहारं रचयाम?

**उत्तर**–आकाशे विविधाः सुन्दरताराश्चित्वा मौक्तिकहारं रचयाम।

(च) केषां गृहेषु हर्षं जनयाम?

**उत्तर**–दुःखित-पीडित-कृषिजनानां गृहेषु हर्षं जनयाम।

## व्याकरण

### प्र–5 विलोमपदानि योजयत–

उन्नतः – अवनतः

गगने – पृथिव्याम्

सुन्दरः – असुन्दरः

चित्वा – विकीर्य

दुःखी – सुखी

हर्षः- शोकः

### प्र–6 समुचितैः पदैः रिक्तस्थनानि पूरयत–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | भानवः |
| द्वितीया | गुरुः | गुरू | गुरून् |
| तृतीया | पशुना | पशुभ्याम् | पशुभिः |
| चतुर्थी | साधवे | साधुभ्याम् | साधुभ्यः |
| पञ्चमी | वटोः | वटुभ्याम् | वटुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | शिशौ | शिश्वोः | शिशुषु |
| सम्बोधन | हे विष्णो | हे विष्णू | हे विष्णवः |

### प्र–7 पर्याय–पदानि योजयत–

- गगने – आकाशे

- विमले – निर्मले
- चन्द्रः – निशाकरः
- सूर्यः   – दिवाकरः
- अम्बुदः -  जलदः

**Sanskrit September Month class-6**

# एकादशःपाठ

## पुष्पोत्सवः (फूलों का उत्सव)

### कठिन शब्दार्थाः

- उत्सवप्रिय - उत्सवों का प्रेमी
- पुष्पव्यजनानि - फूलों के पंखे
- पाटलपुष्पैः - गुलाब से फूलों से
- समाधिस्थले - दरगाह
- यानोत्सवः - गाड़ियों का उत्सव

### शब्दार्थाः

- कुत्रचित - कहीं पर
- पशूत्सवः - पशुओं का उत्सव
- अन्यतमः - कई में से एक
- इति नाम्ना - इस नाम से
- कर्णिकारपुष्पैः - कनेर के फूलों से
- जपापूष्पैः - गुड़हल के फूलों से
- नयन्ति - ले जाते हैं
- यावत - तक
- मल्लिकापुष्पैः - चमेली के फूलों से
- पतङ्गानाम - पतंगो का

# अभ्यासः

# वांचनकार्य

**प्र–1 वचनानुसारं रिक्तस्थानानि पूरयतः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | मन्दिरे | मन्दिरयोः | मन्दिरेषु |
| | असवरे | <u>अवसरयोः</u> | <u>अवसरेषु</u> |
| | <u>स्थले</u> | स्थलयोः | <u>स्थलेषु</u> |
| | <u>दिवसे</u> | <u>दिवसयोः</u> | दिवसेषु |
| | क्षेत्रे | <u>क्षेत्रयोः</u> | <u>क्षेत्रेषु</u> |
| | <u>व्यजने</u> | व्यजनयोः | <u>व्यजनेषु</u> |
| | <u>पुष्पे</u> | <u>पुष्पयोः</u> | पुष्पेषु |

# साहित्य

**प्र–2 कोष्ठकेषु प्रदत्तशब्देषु समुचितपदं चित्वा रिक्तस्थानानि पूरयत-**

(क) **<u>भारते</u>** बहवः उत्सवाः भवन्ति। (भारतम्/भारते)

(ख) **<u>सरोवरे</u>** मीनाः वसन्ति। (सरोवरे/सरोवरात्)

(ग) जनाः **<u>मन्दिरे</u>** पुष्पाणि अर्पयन्ति। (मन्दिरेण/मन्दिरे)

(घ) खगाः **<u>नीडेषु</u>** निवसन्ति। (नीडानि/नीडेषु)

(ङ) छात्राः **<u>प्रयोगशालायाः</u>** प्रयोगं कुर्वन्ति। (प्रयोगशालायाम्/प्रयोगशालायाः)

(च) **<u>उद्याने</u>** पुष्पाणि विकसन्ति। (उद्यानस्य/उद्याने)

**प्र–3 अधोलिखितानि पदानि आधृत्य सार्थकानि वाक्यानि रचयत-**

| | | |
|---|---|---|
| वानराः | वनेषु | तरन्ति |
| सिंहाः | वृक्षेषु | नृत्यन्ति |
| मयूराः | जले | उत्पतन्ति |

| | | |
|---|---|---|
| मत्स्याः | आकाशे | गर्जन्ति |
| खगाः | उद्याने | कूर्दन्ति |

(क) वानराः वृक्षेषु कूर्दन्ति।

(ख) सिंहाः वनेषु गर्जन्ति।

(ग) मयूराः उद्याने नृत्यन्ति।

(घ) मत्स्याः जले तरन्ति।

(ङ) खगाः आकाशे उत्पतन्ति।

**प्र–4 प्रश्नानाम् उत्तराणि लिखत-**

(क) जनाः पुष्पव्यजनानि कुत्र अर्पयन्ति?

**उत्तर–** जनाः पुष्पव्यजनानि योगमायामंदिरे बख्तियारकाकी समाधिस्थले च अर्पयन्ति।

(ख) पुष्पोत्सवस्य आयोजनं कदा भवति?

**उत्तर–** पुष्पोत्सवस्य आयोजनं ऑक्टोबर्मासे भवति।

(ग) अस्माकं भारतदेशः कीदृशः अस्ति?

**उत्तर–** अस्माकं भारतदेशः उत्सवप्रियः अस्ति।

(घ) पुष्पोत्सवः केन नाम्ना प्रसिद्धः अस्ति?

**उत्तर–** पुष्पोत्सवः 'फूलवालों की सैर' नाम्ना प्रसिद्धः अस्ति।

(ङ) मेहरौलीक्षेत्रे कस्याः मन्दिरं कस्य समाधिस्थलञ्च अस्ति?

**उत्तर–** मेहरौलीक्षेत्रे योगमाया मन्दिरे बख्तियारकाकी समाधिस्थलञ्च अस्ति।

**प्र–5 कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत-**

यथा- **सरोवरे** मीनाः सन्ति। (सरोवर)

(क) **तडागे** कच्छपाः भ्रमन्ति (तडाग)

(ख) **शिविरे** सैनिकाः सन्ति। (शिविर)

(ग) यानानि **राजमार्गे** चलन्ति। (राजमार्ग)

(घ) **धरायाम्** रत्नानि सन्ति। (धरा)

(ङ) बालाः **क्रीडाक्षेत्रे** क्रीडयन्ति। (क्रीडाक्षेत्र)

**प्र–6 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-**

| | | | | |
|---|---|---|---|---|
| पुष्पेषु | गङ्गायाम् | विद्यालये | वृक्षयोः | उद्यानेषु |

(क) वयं **विद्यालये** पठामः।

(ख) जनाः **उद्यानेषु** भ्रमन्ति।

(ग) **गङ्गायाम्** नौकाः सन्ति।

(घ) **पुष्पेषु** भ्रमराः गुञ्जन्ति।

(ङ) बालाः **वृक्षयोः** फलानि पक्वानि सन्ति।